शास्त्री - प्रथम खण्ड साहित्य

मेघदूतम् - पूर्वमेघम्

classmate
Date
Page

प्र० (1) - शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।
निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥

उत्तरम् - प्रसंगः - पद्यमिदं महाकवि कालिदास प्रणीतस्य मेघदूताख्य खण्डकाव्यस्य पूर्वमेघ भागादुद्धृतम्। अत्र यक्षो मेघं कथयति यद् वायुपूरिताः कीचकाः कर्णप्रियं शब्दं कुर्वन्ति, किन्नरस्त्रियः शिवस्य त्रिपुरविजयस्तोत्रं गायन्ति। गुहासु तव निर्घोषः मृदङ्गध्वनिरिव स्याच्चेत् शिवस्य संगीतः पूर्णो भविष्यति।

व्याख्या:- हे मेघ! अनिलैः = मारुतैः, वायुभिरित्यर्थः। ("वायुर्मातरिश्वा सदागतिः। पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः। समीर-मारुत मरुज्जगत्प्राणः" इत्यमरः) पूर्यमाणाः = पूरिताः कीचकाः = वेणुविशेषाः मधुरम् = श्राव्यम्, शब्दायन्ते = स्वनन्ति। संसक्ताभिः = संयुक्ताभिः, किन्नरीभिः = किन्नरवनिताभिः, त्रिपुरस्य = त्रिपुरासुरस्य, विजयः = वधः, गीयते = गानं विधीयते। कन्दरेषु = गुहासु, ते = तव मेघस्य, निर्ह्रादः = निर्घोषः, मुरजे = मृदङ्गे, ध्वनिः = शब्द इव स्यात् = भवेत्, चेत् = यदि तर्हि तत्र = चरमन्यासं निकषा। पशूनां पतिः पशुपतिस्तस्य पशुपतेः = भगवतः शिवस्य, संगीतस्यार्थः संगीतार्थः = संगीतवस्तु, समग्रः = सम्पूर्णः, भावी = भविष्यति, ननु = खलु। अत्र श्रौती उपमालंकारः मन्दाक्रान्ता छन्दश्च।

Renu Devi
18/10/20

राधा उमाकान्त सं० महावि० सुरखेना, पूर्णिया

उपशास्त्री - III खण्ड साहित्य तृतीय पत्रम्

किरातार्जुनीयम् प्रथमः सर्गः

प्र० (1) - परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रतिकथयति रक्तचन्दनाङ्गरागाभ्यासी महारथचारी चायं भीमसेनः साम्प्रतं धूलिधूसरितः सन् पदातिरेव पर्वतान्तरेषु पर्यटति, अनेनापि सत्यप्रियस्य तव मानसं न किञ्चिदपि परितप्यते किम् ।

व्याख्याः - लोहितचन्दनोचितः = रक्तचन्दन के योग्य (शरीर वाला), महारथः = बड़े-बड़े रथों में चलने वाला । अयं वृकोदरः = यह भीमसेन । रेणुरूषितः (सन्) = धूल से रूखे शरीर वाला होकर । पदातिः = पैदल ही । अन्तर्गिरि = पहाड़ों के अन्दर, परिभ्रमन् = घूमता हुआ । सत्यधनस्य = सत्य को ही धन मानने वाले (आपके), मानसं = चित्त को, नो दुनोति कच्चित् = दुःखित नहीं करता है क्या ।

Renu Devi
18/10/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-I खण्ड साहित्य

सप्तमोऽङ्कः अभिज्ञानशाकुन्तलम्

प्र० (1) - यथा गजो नेति समक्षरूपे तस्मिन्नपक्रामति संशयः स्यात्।
पदानि दृष्ट्वा तु भवेत्प्रतीतिस्तथाविधो मे मनसो विकारः॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके राजा दुष्यन्तः पूर्वं शकुन्तलाया विस्मृतिः, पश्चात्तदङ्गुलीयकदर्शनेन स्मृतिश्चेति स्वप्रतीतेरसंभवदृष्टान्तप्रदर्शनपूर्वकमाश्चर्यजनकत्वमुपपादयति - यथा = येन प्रकारेण पाददर्शनविकारेण समक्षरूपे समक्षः = प्रत्यक्षं रूपं = स्वरूपं यस्य स तादृशो कस्मिंश्चित्सत्वे गजो न = नायं हस्तीति मिथ्याज्ञानं ततः अपक्रामति तिरोहिते सति तस्मिन् गजो नेति, मिथ्या ज्ञानविषयी भूते तस्मिन् सत्वे संशयः = गजो वा न वेति सन्देहः स्यात्। पदानि = भूमौ तन्न्यासप्रतिबिम्बानि दृष्ट्वा = विलोक्य प्रतीतिः = सत्यं मया दृष्टो गज एवेति सम्प्रत्ययो भवेत् मे = मम मनसः चित्तस्य विकारः = चित्तभ्रमः पूर्वस्यामुपस्थितायामियं न मम भार्येति पुनस्तिरोहितायां भार्या वा न वा पश्चादङ्गुलीयकदर्शनेन मम भार्यैवेति प्रतीतः तथाविधः तादृशः अस्ति। अङ्गुलीयकदर्शनेन या प्रतीतिः साक्षाद्दर्शनेन कथन्न जातेति चित्रं मया न बुध्यते इति भावः॥

Renu Devi
18/10/20

राधा उमाकान्त सं० महावि० सुरखसेना
पूर्णिया।

उपशास्त्री-I खण्ड साहित्य - तृतीय पत्रम्

प्रथमः सर्गः किरातार्जुनीयमहाकाव्यम्

प्र० (1) – भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - हे नरदेव! एतर्हि मनस्विगर्हिते वर्त्मनि वीरजननिन्दिते पथि विचरन्तं अर्थात् शत्रुकृतमपमानं सहमानं भवतम् उद्दीपितः क्रोधः तथा कथं नोद्दीपयति यथा उद्गतज्वालो [illegible] - वह्निः शुष्कं शमीतरुं भस्मसात् करोति।

व्याख्या – हे नरदेव = हे राजन्, एतर्हि = इस समय, मनस्विगर्हिते = सज्जनों से निन्दित। वर्त्मनि = मार्ग में, विवर्तमानं = चलते हुए, [illegible] भवन्तः = आपको। उदीरितः = उद्दीप्त हुआ मन्युः = क्रोध। शुष्कं = सूखे, शमीतरु = शमीवृक्ष को, उच्छिखः = ऊपर को उठरही है लपटें जिसकी (ऐसा), वह्निरिव = अग्नि की तरह, कथं न ज्वलयति = क्यों नहीं रहा है

Renu Devi
18/10/20

राधा उमाकान्त सं० महावि० सुखसेना
पूर्णिया।